# आदर्शप्रश्नपत्रम् सं. 1

# संस्कृतम् (केन्द्रिकम्)

# SANSKRIT (CORE)

## कोड संख्या 322

## द्वादश–कक्षा

| | |
|---|---|
| अवधिः होरात्रयम् | पूर्णाङ्काः : 100 |
| समयः तीन घण्टे | पूर्णाङ्क : 100 |
| Time: 3 Hours | Maximum Marks : 100 |

**निर्देशाः**

- सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।
  जहाँ स्पष्ट संकेत नहीं है, वहाँ उत्तर संस्कृत में ही दीजिए।
  Answer the questions in Sanskrit only unless stated otherwise.
- उत्तराणि पृथक्दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।
  सभी उत्तर अलग दी गई उत्तरपुस्तिका में लिखें।
  Answers should be written only in the separately provided answer-book
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
  इस प्रश्नपत्र में चार खण्ड हैं।
  There are four sections in this question paper.

| | | |
|---|---|---|
| **खण्डः क** | अपठितांश–अवबोधनम् (अपठितांश अवबोधन) | |
| SECTION A | (Reading Comprehension) | 10 अङ्काः |
| **खण्डः ख** | संस्कृतेन रचनात्मककार्यम् (संस्कृत में रचनात्मक कार्य) | |
| SECTION B | (Sanskrit writing Skill) | 15 अङ्काः |
| **खण्डः ग** | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | |
| SECTION C | (Applied Grammer) | 30 अङ्काः |
| **खण्डः (घ)** | भाग (i) पठितांश –अवबोधनम् (पठितांश अवबोधन) | 35 अङ्काः |
| | भाग (ii) सामान्य संस्कृतसाहित्यपरिचयः (सामान्य संस्कृत साहित्य परिचय) | 10 अङ्काः |
| SECTION D | Part (i) Reading Comprehension | |
| | (ii) General Introduction to Sanskrit Literature | |

# खण्डः (क)
# Section (A)

**10**

## अपठितांश – अवबोधनम्
## Unseen Reading Comprehension

1. **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**
**निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर संस्कृत में लिखिए।**
**Read the following passage and answer the questions in Sanskrit.**

पुरा कश्चित् एकः बालः अध्ययने रतः आसीत्। स यत् अपठत् तत् विस्मरति स्म। अतः तस्य सहपाठिनः तम् उपहसन्ति स्म। एकदा आत्मग्लानिपीडितः सः विद्यालयात् निरगच्छत् मार्गे च अचिन्तयत्–नूनम् अहम् मूर्खः अस्मि। अत एव सर्वे माम् उपहसन्ति। मम भाग्ये विद्या नास्ति। सम्प्रति किं करोमि इति चिन्तयन् भ्रमन् मार्गे तेनैकः कूपः दृष्टः। तत्र काश्चन महिलाः स्वघटान् जलेन पूरयन्ति स्म। स कुतूहलात् तत्र स्थितः। अत्रान्तरे सः अपश्यत् यत् यस्मिन् शिलाखण्डे घटः निहितः आसीत् तत्रैकः गर्तः वर्तते। सः वनितां पृच्छति–अम्ब! इमं सुन्दरं गर्तं कः निर्मितवान् इति?'' सा विहस्य अवदत्, ''गर्तः एषः तु प्रतिदिनं घटस्थापनेन निर्मितः, न कोऽपि अस्य निर्माता। ''तद्वचः श्रुत्वा सः अचिन्तयत् यदि भूयोभूयः मृत्तिकाघटस्य स्थापनेन पाषाणशिलायाम् अपि गर्तः सम्पद्यते तदा पुनः पुनः पठनेन मम मतिः कथं न तीव्रा भवेत् इति विचार्य स पुनः विद्यालयं प्रत्यागच्छत्। कालान्तरे विद्याभ्यासेन अयमेव बालः महान् वैयाकरणः बोपदेवः अभवत्। उक्तं च अभ्यासाद् लभते विद्याम् इति।

**प्रश्नाः**

**I. एकपदेन उत्तरत**
**एक पद में उत्तर दीजिए।**
**Answer in one word.** ½ × 4 = 2

(i) बालेन मार्गे कः दृष्टः?

(ii) काश्चन महिलाः जलेन कान् पूरयन्ति स्म?

(iii) गर्तः कुत्र आसीत्?

(iv) महान् वैयाकरणः कः अभवत्?

**II. पूर्णवाक्येन उत्तरत**
**पूर्णवाक्य में उत्तर दीजिए।**
**Answer in one sentence.** 1 × 2 = 2

(i) आत्मग्लानिपीडितः बालः किम् अकरोत्?

(ii) गर्तः तु कथं निर्मितः जातः?

**III.** **यथानिर्देशम् उत्तरत** 4

**निर्देशानुसार उत्तर दीजिए**

**Answer as directed.**

(i) 'सुन्दरं गर्तं' अत्र विशेषणपदं किम्?

(ii) ''सर्वे माम् उपहसन्ति' इत्यत्र कर्तृपदं किम्?

(iii) ''मन्दा'' इत्यस्य विलोमपदं किं प्रयुक्तम्?

(iv) अतः तस्य सहपाठिनः तम् उपहसन्ति स्म ' अत्र' 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**IV.** **अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** 2

**इस गद्यांश के लिए समुचित शीर्षक लिखिए।**

**Please give a suitable title to this paragraph.**

## खण्ड 'ख'

## Section ëëBíí

## संस्कृतेन रचनात्मकं कार्यम् 15

## Sanskrit Writing Skill

**2.** **भवान् प्रणवः चेन्नईनगरे निवसति। भवतः मित्रम् वागीशः परीक्षायाम् उत्तमाङ्कैः उत्तीर्णः। परीक्षायां सफलतायै वर्धापनं प्रदानाय मित्रं प्रति लिखिते अस्मिन् पत्रे मञ्जूषापदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत।**

**आप प्रणव चेन्नई नगर में रहते हैं। आपके मित्र वागीश परीक्षा में उत्तम अंकों से उत्तीर्ण हुए हैं। परीक्षा में सफलता के लिए बधाई देने के लिए मित्र को लिखे इस पत्र में रिक्तस्थानों को मञ्जूषा में दिए गए पदों से भरकर पत्र को उत्तर पुस्तिका में पुनः लिखिए।**

**You are Pranava from Chennai. Your friend Vageesh has succeded in the Board Examination scoring very good marks. Fill in the blanks in the following letter written to your friend congratulating him on his success in the examination. You can take the help of words given in the box and rewrite the letter again.**

½ × 10=5

(i)................................

तिथिः ..........................

प्रिय (ii) ...........................

(iii) ...........................

अत्र कुशलं तत्रास्तु। केन्द्रीयमाध्यमिकशिक्षासङ्घटनेन अद्यैव 8.00 अष्टवादने द्वादशकक्षायाः (iv) .......................................समुद्घोषितः। मया इण्टरनेट इति माध्यमेन तव परीक्षा परिणामः (v) ........................। अस्यां परीक्षायाम् त्वम् पञ्चनवतिः प्रतिशतम् (vi) ........................ प्राप्य समुत्तीर्णः। संस्कृते तु शतम् एव अङ्कान् लब्धवान् असि। योग्यतासूच्याम् अपि तव नाम दृष्ट्वा अहम् हार्दिकं हर्षम् अनुभवामि। (vii) ........................कठोरः परिश्रमः सफलः जातः। त्वया न केवलम् आत्मनः अपि तु स्वकुटुम्बस्य अपि (viii) ........................ वर्धितम्। त्वं भूयोभूयः प्रशंसनीयोऽसि। अहम् एतस्यै उच्च–सफलतायै तुभ्यं हार्दिकं (ix) ........................ यच्छामि। भविष्ये तव का योजना इति लिखतु।

मातृ–पितृचरणयोः प्रणामाः।

तव अभिन्नसुहृद्

(x).....................

**म जूषा**

| |
|---|
| विदितः वागीश, चेन्नईतः, तव, अङ्कान्, |
| यशः, प्रणवः, नमस्ते, वर्धापनम् परीक्षापरिणामः |

**3. म जूषाप्रदत्तशब्दसूचीसाहाय्येन लघुकथांशं पूरयित्वा पुनः लिखत।** ½ ×10 =5

**मञ्जूषा में दिए शब्दों की सहायता से लघु कथा के अंश को पूर्ण कर पुनः लिखिए।**

**Complete the short story with the words given in the box below and rewrite the same.**

एकदा कश्चित् व्याधः जालम् आदाय विहगान् अन्वेष्टुम् इतः ततः परिभ्रमन् वनम् (i)__________। ततः स व्याधः वने (ii)_____________ विकीर्य जालं च प्रसार्य स्वयं प्रच्छन्नः अभवत्। एतस्मिन् अन्तराले कपोतराजः चित्रग्रीवः सपरिवारः तान् तण्डुलान् दृष्ट्वा अनुयायिनः (iii)_____________ अवदत् अस्मिन् (iv)_____________ वने तण्डुलानां संभवः कुतः? तद् भद्रम् इदं न (v)_____________। यतः अनिष्टात् इष्टलाभः अपि न (vi)_____________। एतच्छ्रुत्वा कश्चित् पण्डितम्मन्यः सदर्पम् अवदत् संशयात्मा (vii)_____________ तदनन्तरं ते लुब्धाः कपोताः (viii)_____________________च बद्धाः अभवन्। ततः चित्रग्रीवः तान् अकथयत् – विपत्काले (ix)_____________ धारणीयम्। वयं सर्वे स्वमित्रस्य हिरण्यकस्य मूषकराजस्य समीपं गच्छामः। तदा सर्वे कपोताः संहताः जालम् एवं गृहीत्वा उदपतन्। हिरण्यकेन छिन्नपाशाः कपोताः (x)_____________तं प्रशंसन्ति स्म।

**मञ्जूषा**

| |
|---|
| तण्डुलान्, कपोतान्, अगच्छत्, निर्जने वरम्, |
| पश्यामि, जालेन, धैर्यम्, विनश्यति, कृतज्ञतया। |

4. अधोलिखितविषयेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं संस्कृतेन लिखित! $1 \times 5 = 5$

निम्नलिखित विषयों में से एक विषय पर पांच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए।

**Write a passage of five sentences in Sanskrit on any one of the following topics.**

(i) विद्याविहीनः पशुः।

(ii) संस्कृतं मह्यम् किमर्थं रोचते?

(iii) विद्यालयस्य सम्पत्तेः रक्षा करणीया।

## खण्डः 'ग'

## Section C

## अनुप्रयुक्तव्याकरणम्

## अनुप्रयुक्त व्याकरण

**30**

## Applied Grammar

5. अधोलिखितेषु वाक्येषु रेखांकितपदेषु सन्धिविच्छेदं कुरुत। $1 \times 6 = 6$

निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धिच्छेद कीजिए।

**Disjoin Sandhis in the bold typed words in the following sentences.**

(i) सत्यमेव जयति **नानृतम्।**

(ii) **जीवत्यनाथोऽपि** वने विसर्जितः।

(iii) **इनश्च** दिनस्य।

(iv) अद्य **ममोपवासः** अस्ति।

(v) **तदन्यत्र** गम्यताम् इति।

(vi) **हितान्न** यः **संशृणुते** स किंप्रभुः।

6. अधोलिखितेषु वाक्येषु स्थूलपदानां विग्रहाः लेख्याः।

निम्नलिखित वाक्यों में स्थूलपदों के विग्रह लिखिए।

**Expound the compounds in bold words in the following sentences.** $1 \times 6 = 6$

(i) **शोकविमोकः** कोकलोकस्य।

(ii) अयमेव **अहोरात्रं** जनयति।

(iii) सर्वे **यथास्थानम्** उपविशन्ति।

(iv) तेऽपि **उत्सवप्रियाः।**

(v) **सुमहिमा** यद्यस्ति किं मण्डनैः।

(vi) दुराराध्या **राजलक्ष्मीः।**

**7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतप्रकृतिप्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत।**

**नीचे लिखे हुए वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़ कर खाली स्थान भरिए।**

**Rewrite the following sentences by adding suffixes to the roots and words given in the brackets.** $1 \times 8 = 8$

(i) तिष्ठ तिष्ठ न ———————— (गम् + तव्यत्)

(ii) अस्य प्रयोजनं (ज्ञा+तुमुन्) ——————— इच्छामि।

(iii) आर्यः शिरसा (प्र+नम्+ल्यप्)——— विज्ञापयति।

(iv) हुतं च (दा + क्त) ———————— च सदैव तिष्ठति।

(v) अन्यत्र (भुज् + क्त्वा) ————— गच्छामि।

(vi) सूर्यम् आश्रित्य ————— परार्द्धसंख्या भवति। (परमेष्ठ + इन्)

(vii) मत्यस्यजीविभिः सरः ————— नीतम्। (निर्मत्स्य + तल्)

(viii) इदम् अभियानं रोचकं ————— चासीत्। (साहस+ठक्)

**8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्।**

**अधोलिखित वाक्यों में कर्ता और क्रिया की अन्विति कीजिए।**

**Please write the suitable verb according to the subject or vice versa in the following sentences.** $1 \times 5 = 5$

(i) आर्य! निमंत्रितः अस्ति/असि।

(ii) एते गिरयः अतीव शोभते/शोभन्ते।

(iii) अद्भिः गात्राणि शुद्ध्यति/शुद्ध्यन्ति।

(iv) आर्य वैहीनरे! सुगाङ्गमार्गम् आदेशय/आदेशयति।

(v) मत्स्यजीविनः अत्र मत्स्यसंक्षयं करिष्यति/करिष्यन्ति।

अथवा **(Or)**

**अधोदत्तेषु वाक्येषु मञ्जूषातः विशेषणपदानि चित्वा विशेष्यपदैः सह योजयत**
**अधोलिखित वाक्यों में विशेषण पद मञ्जूषा से छांट कर विशेष्य पदों के साथ जोड़िए।**

**Match the adjectives with nouns in the following sentences.**
**(The adjective words have been given in the box)**

(i) ——————— ऋषयः भवन्ति।

(ii) कथं स्पर्धते मया सह————————— राक्षसः।

(iii) ———————— छदिप्रान्तः।

(iv) ————————— भोजनानां दात्री भव।

(v) ———————— एव भवत्याः प्रस्तुतिः।

**मञ्जूषा**

| |
|---|
| प्रशंसनीया, दुरात्मा, शोभनानां, आप्तकामाः, अतिनमितः |

9. **अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्।**
**निम्नलिखित वाक्यों में कोष्ठक के शब्दों में उपपद विभक्ति का प्रयोगकर रिक्त स्थानों की पूर्ति कीजिए।**
**Fill in the blanks using appropriate case-endings with the words given in the brackets.** $1 \times 5 = 5$

(i) अये! ————————— अध्यास्ते वृषलः। (सिंहासन)

(ii) ———————— समम् अन्यत्र भुक्त्वा गच्छामि। (पारावत)

(iii) तदलं भवतः —————————— (सन्ताप)

(iv) एषः स्तम्भः —————————— विना तथैव तिष्ठति। (विकृति)

(v) ——— नमो नमः (सर्व)

## खण्डः 'घ' (Section D)

## भागः (1) Part - 1

**35**

## पठितांश अवबोधनम्

## पठितांश–अवबोधन

## Reading Comprehension

**10. अधोलिखितं गद्यांशं पठित्वा संस्कृतेन प्रश्नान् उत्तरत।**

**नीचे लिखे गद्यांश को पढ़कर संस्कृत में प्रश्नों के उत्तर दीजिए।**

**Read the following prose passage and answer the questions in Sanskrit.** 5

अयमेव अहोरात्रं जनयति। अयम् एव वत्सरं द्वादशसु भागेषु विभनक्ति। अयम् एव कारणम् षण्णाम् ऋतूनाम्। एष एव अङ्गीकरोति उत्तरं दक्षिणं चायनम्। अनेन एव सम्पादिताः युगभेदाः। अनेन एव कृताः कल्पभेदाः। एनम् एव अश्रित्य भवति परमेष्ठिनः परार्धसख्या। वेदा एतस्य एव वन्दिनः। गायत्री अमुम् एव गायति। धन्य एष कुलमूलं श्रीरामचन्द्रस्य। प्रणम्यः एषः विश्वेषाम्।

**I. एकपदेन उत्तरत** ½ × 2 =1

**एक शब्द में उत्तर दें।**

**Answer in one word.**

(i) श्री रामचन्द्रस्य कुलमूलं कः अस्ति?

(ii) सूर्यस्य वन्दिनः के सन्ति?

**II. पूर्णवाक्येन उत्तरत।** 1 × 2 =2

**पूर्णवाक्य में उत्तर दें।**

**Answer in a complete sentence.**

सूर्यः वत्सरं कति भागेषु विभनक्ति?

**III. यथानिर्देशमुत्तरत** ½ × 2 =1

**निर्देशानुसार उत्तर दीजिए।**

**Do as directed**

(i) ''रात्रिन्दिवम्'' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(ii) ''षण्णाम् ऋतूनाम्' अत्र किं विशेषणपदम्?

(iii) प्रणम्यः एषः विश्वेषाम् अत्र 'एषः' सर्वनामपदं कस्मै प्रयुक्तम्? 1× 2 =2

(iv) ''गायति' क्रियापदस्य कर्तृपदं किम्?

**11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत**

**निम्नलिखित नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।**

**Read the following drama passage and answer the questions.**

**(ततः प्रविशति चारुदत्तो विदूषकः चङ्गेरिकाहस्ता चेटी च)** 5

चारुदत्तः (दीर्घं निःश्वस्य) भोः दारिद्र्यं खलु नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्।

विदूषकः अलम् इदानीं भवतः अतिमात्रं सन्तप्तुम्। दानेन विपन्नविभवस्य बहुलपक्षचन्द्रस्य ज्योत्स्नापरिक्षय इव भवतः रमणीयोऽयं दरिद्रभावः।

चारुदत्तः न खल्वहं नष्टां श्रियम् अनुशोचामि। गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति।

**I. एकपदेन उत्तरत** ½ × 2 =1

**एक पद में उत्तर दीजिए।**

**Answer in one word.**

(i) चङ्गेरिकाहस्ता का अस्ति?

(ii) कस्य पुरुषस्य व्यसनं दारुणतरं भवति?

**II. पूर्णवाक्येन उत्तरत।** 1 × 1 =1

**पूरे वाक्य में संस्कृत में उत्तर दीजिए।**

**Answer in one sentence in Sanskrit.**

चारुदत्तस्य किमिव रमणीयोऽयं दरिद्रभावः?

**III. यथानिर्देशमुत्तरत**

**निर्देशानुसार उत्तर दीजिए**

**Do as directed.**

(i) ''रमणीयोऽयं दरिद्रभावः'', अत्र किं विशेषणपदम्? ½

(ii) ''सम्पन्न'' इत्यस्य विपरीतार्थकं पदं किम्? ½

(iii) ''भवतः रमणीयोऽयं दरिद्रभावः' अत्र 'भवतः' सर्वनामपदं कस्मै प्रयुक्तम्? 1 ×1 =1

(iv) अनुशोचामि इति क्रियापदस्य कर्तृपदं किम्? 1 ×1 =1

**12** **अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत**
**निम्नलिखित पद्य को पढ़कर प्रश्नों के उत्तर दीजिए।**
**Read the following verse and answer the questions.**

**शिक्षा क्षयं गच्छति कालपर्ययात्सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च सदैव तिष्ठति।।**

I. **एकपदेन उत्तरत** ½ × 2 =1
**एक शब्द में उत्तर दीजिए।**
**Answer in one word.**

(i) सुबद्धमूलाः के निपतन्ति?
(ii) कालपर्ययात् क्षयं का गच्छति?

II. **पूर्णवाक्येन उत्तरत** 1 × 2 =2
**पूरे वाक्य में उत्तर दीजिए।**
**Answer in one sentence in Sanskrit.**

सदैव किं किं तिष्ठति?

III. **यथानिर्देशमुत्तरत**
**निर्देशानुसार उत्तर दीजिए**
**Answer as directed** ½ × 4 =2

(i) 'जलं जलस्थानगतं' अत्र किं विशेषणपदम्?
(ii) 'विनाशम्' इत्यर्थे किं पदमत्र प्रयुक्तम्?
(iii) 'तिष्ठति' इति क्रियापदस्य किं विलोमपदम्?
(iv) 'सुबद्धमूलाः निपतन्ति पादपाः अत्र कर्तृपदं किम्?

**13.** **अधोदत्तं श्लोकद्वयं पठित्वा यथानिर्देशम् उत्तरत**
**नीचे लिखे दो श्लोकों को पढ़कर निर्देशानुसार उत्तर दीजिए।**
**Read the following two verses and answer as directed.**

I. अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।
आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत्।। 1 +1 =2

**अस्य श्लोकस्य कः सन्दर्भग्रन्थः लेखकः च।**

II. विभवानुवशा भार्या समदुःखसुखो भवान्।
सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

**इमं श्लोकं कः कम् प्रति कथयति?** 1 +1 =2

**14. अत्र प्रदत्तभावार्थत्रये शुद्धभावार्थचयनं कृत्वा लिखत**

**प्रत्येक अंश के लिए दिये गए तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए।**

**Three explanations are given for each line. Select the correct one and write.**

I. **उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत**

**भावार्थः**

(क) निद्रां त्यक्त्वा इष्टवस्तूनि लभध्वम्।

(ख) अज्ञाननिद्रां विहाय श्रेष्ठान् उपगम्य ज्ञानं लभध्वम्।

(ग) जागरणेनैव इष्टवस्तूनि प्राप्तुं यतध्वम्।

II. **निस्पृहत्यागिभिः एतादृशैः जनैः राजा तृणवद् गण्यते।**

(क) राजा त्यागिनः जनान् किमपि न गणयति।

(ख) त्यागिनः राजानम् स्वल्पं वस्तु याचन्ते। 2+2 = 4

(ग) इच्छारहिताः त्यागिनः जनाः राजानम् अपि न गणयन्ति।

**अथवा (Or)**

**अधोदत्तस्य श्लोकस्य प्रदत्तं भावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत**

**नीचे दिये गए श्लोक के भावार्थ को मञ्जूषादत्त पदों से पूर्ण करके लिखिए।**

**Complete the central idea of the given verse with the words given in the box and rewrite the same.**

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।

हिमालयः अनन्तरत्नानाम् (i) --------------सन् शोभते। एषः पर्वतः (ii) -------------- अपि पूर्णः वर्तते। परं हिमं (iii) --------------सौन्दर्यं (iv) --------------------------नैव समर्थः। यतो हि एकः दोषः (v) -------------- तथैव विलुप्तः (vi) --------------यथा (vii) --------------किरणेषु (viii) ------------तिरोहितः भवति।

**मञ्जूषा**

| |
|---|
| हिमेन, हिमालयस्य, उत्पादकः दृश्यते, |
| चन्द्रस्य, विनष्टुं, कलङ्कः, गुणसमूहेषु |

**15.** **अधोलिखितश्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –**
**निम्नलिखित दो श्लोकों के दिए गए अन्वयों में रिक्तस्थानों की पूर्ति कर पुनः लिखिए–**
**Fill in the blanks in the prose order rendering of the following two verses and re-write the same.** ½×4 =2

**(अ) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानम् ततो न विजुगुप्सते।।**

अन्वयः

यः तु ———————— भूतानि आत्मनि एव ————————, सर्वभूतेषु

च ———————— ततः ———————— विजुगुप्सते।

**(आ) निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः।** ½×4 =2
**पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते।।**

अन्वयः – निर्वैराः ———————— विमुखीभवन्ति ———————— स्फीताः भवन्ति, पापं कर्म च ———————— परैः अपि कृतम् तत् ———————— सम्भाव्यते।

**16.** **स्तम्भद्वये अधः प्रदत्तवाक्यानां सार्थकं संयोजनं कृत्वा क्रमेण लिखत।**
**दो स्तम्भों में दिए गए निम्नलिखित वाक्यों का सार्थक संयोजन कर क्रम से लिखिए।**
**Rewrite the following sentences as per their sequential order.**

| | |
|---|---|
| (i) उत्तिष्ठत जाग्रत | (क) लद्दाख इति वदन्ति। |
| (ii) तथा चतुर्भिः पुरुषः परीक्ष्यते | (ख) यद् दरिद्रेषु दुर्लभम्। |
| (iii) उत्तुङ्गपर्वतानाम् उपत्यकाभूमिम् | (ग) त्यागेन शीलेन गुणेन कर्मणा। |
| (iv) सत्त्वं च न परिभ्रष्टं | (घ) प्राप्य वरान् निबोधत। |

1 × 4 = 4

**17.** **अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत –**
**अधोलिखित पंक्तियों में स्थूलाक्षर पदों का प्रसङ्ग के अनुसार शुद्ध अर्थ चुनकर लिखिए।**
**Select and write the appropriate meaning of the bold words as per reference to their context.**

(i) **सत्त्वं** च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।
(क) सतोगुणः (ख) चरित्रम् (ग) मनः

(ii) **अद्भिः** गात्राणि शुध्यन्ति।
(क) भोजनेन (ख) जलेन (ग) वस्त्रेण

(iii) **वदनं** प्रसादसदनम्।
(क) मुखम् (ख) शरीरम् (ग) सङ्गीतम्

(iv) जम्बूवृक्षस्य प्राग्**वल्मीकः।**
(क) वाल्मीकिः (ख) परिधिः (ग) सर्पगृहम् $1 \times 4 = 4$

# खण्ड 'घ' Section D

# भाग II Part II

# सामान्यः संस्कृतसाहित्यपरिचयः

# सामान्य संस्कृत साहित्य परिचय

# General Sanskrit Literature

**18.** **अधोलिखितानां कवीनां देश–काल–कृतीनां यथानिर्देशं नामानि लिखत।**
**निम्नलिखित कवियों के देश, काल एवं कृतियों का निर्देशानुसार नाम लिखिए।**
**Write the names of the place, date and works of the following poets as directed.**

**कवयः**

(i) बाणभट्टः
(ii) भवभूतिः
(iii) आर्यभटः
} देशः

(i) भासः
(ii) वराहमिहिरः
(iii) अम्बिकादत्तव्यासः
} कालः

(i) भारविः
(ii) सुश्रुतः
(iii) श्री विष्णुशर्मा
(iv) कौटिल्यः
} काचिदेका कृतिः $3 + 3 + 4 = 10$

**अथवा** (OR)

**(अ) अधः मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानपूर्तिं कुरुत।**
**नीचे मञ्जूषा में दिये गए पदों से रिक्त स्थानों की पूर्ति कीजिए।** 5
**Fill in the blanks with the words given in the box below -**

(i) छन्दोयुक्तरचना ––––––– कथ्यते। तस्य मुख्यतः भेदद्वयम् – महाकाव्यम् –––––– च।

(ii) संस्कृतसाहित्ये ––––––––––––– रसाः भवन्ति। तेषु प्रधानः रसः ––––––– अस्ति।

(iii) गद्यं कवीनां –––––––––– वदन्ति। कथा ––––––––– च तस्य प्रमुखं भेदद्वयम्।

(iv) रूपकस्य ––––––– भेदाः सन्ति। ––––––––––रूपकस्य भेदः।

(v) नाटकस्य मुख्यं तत्त्वं ––––––––––– अस्ति। नाटकस्य आदौ ––––––– भवति।

**मञ्जूषा**

| |
|---|
| निकषं, पद्यम्, खण्डकाव्यं, दश, अभिनयः<br>नाटकम्, शृङ्गारः, नव, नान्दी, आख्यायिका |

**(ब) संस्कृतनाटकस्य पञ्च विशेषताः संस्कृतेन लिखत।**
**संस्कृतनाटक की पांच विशेषताएं संस्कृत में लिखिए।**
**Write five characteristics of Sanskrit Drama in Sanskrit.** 5

# आदर्शप्रश्नपत्र सं.–1
# केन्द्रिकम् (CORE)
# अङ्कयोजना
# कक्षा – द्वादशी XII

**अवधिः होरात्रयम्** | **कोड सं. 322**

**पूर्णाङ्काः 100**

Time : 3 Hours | Maximum Marks : 100

| क्रमांङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 1. अ | तथ्यबोध–परीक्षणम् | अतिलघूत्तरः एकपदेन उत्तरम् | (i) कूपः<br>(ii) घटान्<br>(iii) शिलाखण्डे<br>(iv) बोपदेवः | ½<br>½<br>½<br>½ | 2 |
| ब | तथ्यबोध–परीक्षणम् | लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) आत्मग्लानिपीडितः बालः विद्यालयात् निरगच्छत् मार्गे च अहम् मूर्खः अस्मि इति अचिन्तयत्।<br>(ii) गर्तः तु प्रतिदिनं घटस्थाप–नेन एव निर्मितः जातः। | 1<br>1 | 2 |
| स | भाषिकतत्त्वबोध–परीक्षणम् | अतिलघूत्तरः | | | |
| द | भाषिकतत्त्वबोधः | (i) विशेषणचयनम्<br>(ii) कर्तृपदचयनम्<br>(iii) विलोमचयनम्<br>(iv) संज्ञापदचयनम् | (i) सुन्दरं<br>(ii) सर्वे<br>(iii) तीव्रा<br>(iv) बालस्य | 1<br>1<br>1<br>1 | 4 |
| ङ | शीर्षकप्रदानम् | अतिलघूत्तरः | (i) श्रमशीलः बालः<br>**अथवा**<br>अभ्यासात् लभते विद्याम्<br>**अथवा**<br>बोपदेवः<br>**अथवा**<br>किमपि अन्यत् | 2 | 2<br>10 |

## खण्डः 'ख'

## रचनात्मककार्यम्

अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमे प्रश्ने लिखिते पत्रे मञ्जूषातः शब्दान् चित्वा विभिन्नरिक्तस्थानानां पूर्तिः करणीया। दश रिक्तस्थानानि सन्ति। प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः (½) अङ्कः निर्धारितः।

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क-सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 2. | पत्रलेखने अनौपचारिक–कार्यपरीक्षणम् | रिक्तस्थानपूर्तिः औपचारिककार्यम् | (i) चेन्नईतः | ½ | 2 |
| | | | (ii) वागीश | ½ | |
| | | | (iii) नमस्ते | ½ | |
| | | | (iv) प्रणवः | ½ | |
| | | | (v) परीक्षापरिणामः | ½ | |
| | | | (vi) विदितः | ½ | |
| | विषयवस्तु–बोधपरीक्षणम् | रिक्तस्थानपूर्तिः विषयवस्तु–अवबोधनम् | (vii) अङ्कान् | ½ | |
| | | | (viii) तव | ½ | |
| | | | (ix) यशः | ½ | 3 |
| | | | (x) वर्धापनं | ½ | |
| | | | | | **5** |
| 3. अस्मिन् प्रश्ने लघुकथायां रिक्तस्थानपूर्तिः अपेक्षिता। (प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः (½) अङ्कः निर्धारितः। | | | | | |
| | अवबोधपूर्वकम् वाक्यसंचरना / प्रयोगपरीक्षणम् | रिक्तस्थानपूर्तिः | (i) अगच्छत् | ½ | |
| | | | (ii) तण्डुलान् | ½ | |
| | | | (iii) कपोतान् | ½ | |
| | | | (iv) निर्जने | ½ | |
| | | | (v) पश्यामि | ½ | |
| | | | (vi) वरम् | ½ | |
| | | | (vii) विनश्यति | ½ | |
| | | | (viii) जालेन | ½ | |
| | | | (ix) धैर्यम् | ½ | |
| | | | (x) कृतज्ञतया | ½ | 5 |
| 4. कमपि एकं विषयम् अवलम्ब्य पंचवाक्यानि लेखनीयानि। अवबोधपूर्वकं वाक्यनिर्माणम्। | | | | | 5 |

15

## खण्डः 'ग'

## अनुप्रयुक्तव्याकरणम्

**अस्मिन् खण्डे भाषायाः तत्त्वानां व्यावहारिकप्रयोगः अपेक्षितः।**

**अस्य आधारः पाठ्यपुस्तकम् 'ऋतिका' द्वितीयः भागः अस्ति।**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 5. | वाक्येषु सन्धिच्छेद–परीक्षणम् | अनुप्रयोगात्मकः स्थूलाक्षरपदानां सन्धिविच्छेदः | (i) न + अनृतम् | 1 | |
| | | | (ii) जीवति+अनाथः+अपि | ½ + ½ | |
| | | | (iii) इनः + च | 1 | |
| | | | (iv) मम + उपवासः | 1 | |
| | | | (v) तत् + अन्यत्र | 1 | |
| | | | (vi) किम् + प्रभुः | 1 | |
| | | | | | **6** |
| 6. | वाक्येषु समस्त–पदानां विग्रहः | स्थूलाक्षरपदानां विग्रहः करणीयः | (i) शोकस्य विमोकः | 1 | |
| | | | (ii) अहः च रात्रिः च तयोः समाहारः | 1 | |
| | | | (iii) स्थानम् अनतिक्रम्य | 1 | |
| | | | (iv) उत्सवः प्रियः येभ्यः ते | 1 | |
| | | | (v) शोभनः महिमा | 1 | |
| | | | (vi) राज्ञः लक्ष्मीः | 1 | |
| | | | | | **6** |
| 7. | वाक्येषु कृदन्त–तद्धितप्रत्ययानां प्रयोगपरीक्षणम् | प्रकृति–प्रत्ययौ योजयित्वा वाक्य–सन्दर्भानुसारं रिक्त–स्थानपूर्तिः | (i) गन्तव्यम् | 1 | |
| | | | (ii) ज्ञातुम् | 1 | |
| | | | (iii) प्रणम्य | | |
| | | | (iv) दत्तं | 1 | |
| | | | (v) भुक्त्वा | 1 | |
| | | | (vi) परमेष्ठिनः | 1 | |
| | | | (vii) निर्मत्स्यगतां | 1 | |
| | | | (viii) साहसिकम् | 1 | |
| | | | | | **8** |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित—उत्तराणि | अङ्क— सङ्केताः | अङ्क- विभागः |
|---|---|---|---|---|---|
| 8. | कर्तृक्रियापद— अन्विति— परीक्षणम् | वाक्येषु शुद्धक्रियापद— चयनेन रिक्तस्थानपूर्तिः | (i) असि<br>(ii) शोभन्ते<br>(iii) शुद्धयन्ति<br>(iv) आदेशय<br>(v) करिष्यन्ति | 1<br>1<br>1<br>1<br>1 | |
| | | | **अथवा or** | | |
| | विशेषण— पदचयन— परीक्षणम् | मञ्जूषातः विशेषणपद— चयनं कृत्वा रिक्तस्थानपूर्तिः | (i) आप्तकामाः<br>(ii) दुरात्मा<br>(iii) अतिनमितः<br>(iv) शोभनानां<br>(v) प्रशंसनीया | 1<br>1<br>1<br>1<br>1 | **5** |
| 9. | उपपदविभक्ति— प्रयोग— परीक्षणम् | कोष्ठकात् शब्देषु उपपदविभक्ति— प्रयोगेण रिक्तस्थानपूर्तिः | (i) सिंहासनम्<br>(ii) पारावतैः<br>(iii) सन्तापेन<br>(iv) विकृतिं<br>(v) सर्वेभ्यः | 1<br>1<br>1<br>1<br>1 | **5** |
| | | | | | **30** |

## खण्ड 'घ'
## पठितांशः–अवबोधनम्
## भागः I

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|---|
| 10. | पठितगद्यांश–बोध परीक्षणम् | अ | अतिलघूत्तरः एकपदेन उत्तरम् | (i) सूर्यः<br>(ii) वेदाः | ½<br>½ | 1 |
| | | ब | लघूत्तरः पूर्णवाक्येन | सूर्यः वत्सरं द्वादशसु भागेषु विभनक्ति | 1 | 1 |
| | भाषिकतत्व–प्रयोगपरीक्षणम् | स.(i) | पर्यायपद–चयनम् | (i) अहोरात्रम् | ½ | 1 |
| | | (ii) | विशेषणपदम् | (ii) षण्णाम् | ½ | |
| | | द(i) | सर्वनामस्थाने संज्ञाप्रयोगः | (i) सूर्यस्य कृते | 1 | |
| | | (ii) | कर्तृपदचयनम् | (ii) गायत्री | 1 | 2 |
| | | | | | | **5** |
| 11. | पठितनाट्यांश–बोधपरीक्षणम् | अ. | अतिलघूत्तरः एकपदेन उत्तरम् | (i) चेटी<br>(ii) गुणरसज्ञस्य | ½<br>½ | 1 |
| | | ब. | लघूत्तरः पूर्णवाक्येन उत्तरम् | चारुदत्तस्य बहुलपक्ष–चन्द्रस्य ज्योस्नापरिक्षयः इव रमणीयोऽयं दरिद्रभावः। | 1 | 1 |
| | भाषिकतत्व–प्रयोगपरीक्षणम् | स. | विशेषणपद–चयनम् | (i) रमणीयः, अयम्<br>(ii) 'विपन्न' इति | ½ | 1 |
| | | (ii) | विलोमपद–चयनम् | | ½ | |
| | | द. (i) | सर्वनामस्थाने संज्ञाप्रयोगः | (i) 'चारुदत्तस्य' कृते<br>(ii) अहम् | 1 | |
| | | (ii) | कर्तृपदचयनम् | | 1 | 2 |
| | | | | | | **5** |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 12. | पठितपद्यांश–बोधपरीक्षणम् | अ. अतिलघूत्तरः एकपदेन उत्तरम् लघूत्तरः | (i) पादपाः<br>(ii) शिक्षा | ½<br>½ | 1 |
| | | ब. लघूत्तरः पूर्णवाक्येन उत्तरम् | हुतं च दत्तं च सदैव तिष्ठति | 1 | 1 |
| | भाषिकतत्त्व–प्रयोगपरीक्षणम् | स. (i) विशेषणपद–चयनम्<br>(ii) पर्यायपद–चयनम् | (i) जलस्थानगतं<br>(ii) क्षयम् | ½<br>½ | 1 |
| | | द. (i) विलोमपद–चयनम्<br>(ii) कर्तृपदचयनम् | (i) 'गच्छति<br>(ii) पादपाः | 1<br>1 | 2 |
| | | | | | **5** |
| 13. | प्रसङ्गसन्दर्भ–ग्रन्थलेखक–परिचयपरीक्षणम् | 1. सन्दर्भग्रन्थस्य लेखकस्य च् नामलेखनम् | (i) पञ्चतन्त्रम्–ग्रन्थः<br>श्री विष्णुशर्मा–लेखकः | 1<br>1 | 2 |
| | | 2. कः कथयति<br>कं कथयति | (i) चारुदत्तः (कः)<br>विदूषकम् (प्रतिं) | 1<br>1 | 2 |
| 14. | भावार्थबोध–परीक्षणम् | प्रदत्तेषु भावार्थेषु शुद्धभावार्थचयनम् | I 'ख'<br>II 'ग'<br>अथवा | 2<br>2 | 4 |
| | भावार्थबोध–परीक्षणम् | प्रदत्तभावार्थे मञ्जूषादत्तपदैः पूरणम् (रिक्तस्थानपूर्तिः) | (i) उत्पादकः<br>(ii) हिमेन<br>(iii) हिमालयस्य<br>(iv) विनष्टुं<br>(v) गुणसमूहेषु<br>(vi) दृश्यते<br>(vii) चन्द्रस्य<br>(viii) कलङ्कः | ½<br>½<br>½<br>½<br>½<br>½<br>½<br>½ | 4 |

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 15. | अन्वय–परीक्षणम् | रिक्तस्थान–पूर्तिमाध्यमेन | अ (i) सर्वाणि | ½ | |
| | | | (ii) अनुपश्यति | ½ | |
| | | | (iii) आत्मानम् | ½ | |
| | | | (iv) न | ½ | 2 |
| | | | आ (i) सुहृदः | ½ | |
| | | | (ii) आपदः | ½ | |
| | | | (iii) यत् | ½ | |
| | | | (iv) तस्य | ½ | 2 |
| 16. | सार्थकवाक्य–संयोजनपरीक्षणम् | वाक्यानां क्रमानुसारं संयोजनम् | (i) → घ | 1 | |
| | | | (ii) → ग | 1 | |
| | | | (iii) → क | 1 | |
| | | | (iv) → ख | 1 | 4 |
| 17. | प्रसङ्गानुसारम्–अर्थचयनम् | त्रिषु शब्दार्थेषु शुद्धशब्दार्थ–चयनम् | (i) मनः | 1 | |
| | | | (ii) जलेन | 1 | |
| | | | (iii) मुखम् | 1 | |
| | | | (iv) सर्पगृहम् | 1 | 4 |

35

# खण्ड 'घ'
## भागः 2
## सामान्य संस्कृत साहित्य परिचयः **10**

| क्रमाङ्कः | उद्देश्यम् | प्रश्नप्रकारः | अपेक्षित–उत्तराणि | अङ्क–सङ्केताः | अङ्क-विभागः |
|---|---|---|---|---|---|
| 18. | संस्कृतसाहित्य–बोध परीक्षणम् | कवीनां देश–काल–कृतीनाम् उल्लेखनम् | देशः (i) प्रीतिकूटः ग्रामः | 1 | |
| | | | (ii) पद्मपुरम् | 1 | 3 |
| | | | (iii) कुसुमपुरम् | 1 | |
| | | | कालः (i) ई.पू.–चतुर्थ शताब्दी | 1 | |
| | | | (ii) षष्ठी शताब्दी | 1 | 3 |
| | | | (iii) एकोनविंशति शताब्दी | 1 | |
| | | | कृतिः (i) किरातार्जुनीयम् | 1 | |
| | | | (ii) सुश्रुत संहिता | 1 | 4 |
| | | | (iii) पञ्चतन्त्रम् | 1 | |
| | | | (iv) अर्थशास्त्रम् | 1 | |
| | | | | | **10** |
| | | **अथवा** | | | |
| | संस्कृतसाहित्य बोध परीक्षणम् | अ मञ्जूषायां प्रदत्त्–पदैः रिक्तस्थान–पूर्तिमाध्यमेन | (i) पद्यम् | ½ | |
| | | | (ii) खण्डकाव्यम् | ½ | |
| | | | (iii) नव | ½ | |
| | | | (iv) शृङगारः | ½ | |
| | | | (v) निकषं | ½ | |
| | | | (vi) आख्यायिका | ½ | |
| | | | (vii) दश | ½ | |
| | | | (viii) नाटकम् | ½ | |
| | | | (ix) अभिनयः | ½ | |
| | | | (x) नान्दी | ½ | 5 |
| | संस्कृतसाहित्य अवबोध परीक्षणम् | ब संस्कृतनाटकानां पञ्चवैशिष्ट्य लेखनम् | **नाटकम्–** | | |
| | | | (i) अभिनयः प्रमुखं तत्त्वम् भवति। | 1 | |
| | | | (ii) कथानकं प्रसिद्धं पौराणिकं वा भवति। | 1 | |
| | | | (iii) नाटकस्य आरम्भे नान्दी भवति। अन्ते च भरतवाक्यम् | 1 | 5 |
| | | | (iv) न्यूनतमाः पञ्च अङ्काः भवन्ति। | 1 | |
| | | | (v) शृंगारः वीर करूणः वा रसः भवति। | 1 | **10** |